तोज्ञापनांगीकारात् अत एव गर्गाः विदा इत्यादौ ञिनित्यादिरिति स्वरवारणार्थं लुकि स्वरविधौ प्रत्ययलक्षणं नेति वचनमारब्धं न तु मनेति सूत्रे
भाष्ये इत्संज्ञाया लुकः प्रागप्रवृत्तौ तु तदसङ्गतिः स्पष्टैव अत एव देवदारोर्विकारः फलं देवदारु ओरञ् इत्यत्र फले लुगिति लुकि तस्य विकारे ञि
तभवतत्मात्ययादित्यञि दैवदारवमित्युदाहृतं सिध्यति तथा विदस्य गोत्रापत्यानि विदाः ततो विदस्य यूनि अत इञ् तस्य ण्यक्षत्रियेति लुक् अतश्च प्रत्य
यात् परत्वात् लुकि विदः इदं च नचैवं भसंज्ञापि लुका न बाध्यते इति राजपुरुषासिद्धिरिति वाच्यम् उपजमिष्यतीत्यायेनन लुमतेति निषेधे
नमामपि तदप्रवृत्त्यंगीकारादिति बोध्यम् एवं पीतमम्बरं यस्याः सा पीताम्बरेत्यत्र सोर्लुकि स्थानिवत्त्वेनागिदन्तत्वाद् उगितश्चेति ङीप् न एवं श्वि
स्विनमात्मे इति णिचि टिलोपे क्विपि शिगित्यत्र स्थानिवत्त्वेन इत्त्वादि न हन्तीति नियमेनोपधादीर्घवारणेपि वर्तमाने सौ चेति दीर्घो न स्यात् तत्र
नेत्यनुवर्तनेन दामलुनोः स्यात्लीमिति लुनी तमाचष्टे णिचि क्विपि तलुनौ तलुन इत्यादौ अनुनासिकस्येति सर्वनामस्थाने तिवां दीर्घो न· बहवः श्विवि-

स·भ· तोयस्यां नगर्य्यां सा बहुश्रिनगरीत्यत्रेन: स्त्रियामिति कपून एवं कल्याणधर्म्माणमाचष्टे कल्याणधर्म्मयतिततः क्विप कल्याणधर्मा तस्यामर्मापमु
१०१ पकल्याणधर्म्माम् इत्यत्रापि स्थानिवत्वेनान्तत्वात् अनश्चेति टचून एवम् प्रजसमाचष्टे अप्रजयतिततः क्विप् सो ऽस्यास्तीति अप्रज्वान इत्य
त्रस्थानिवत्वेनासन्तत्वादसन्तलक्षणो विन्न इति· अन्यथा क्तप्रत्ययलोपेपिस्थानिवत्वेन तदन्तत्वात् उक्तोदाहरणेषु तेने विधयस्स्यु
रेवेति बोध्यम् प्रत्ययस्यासाधारणमिति· अत्रप्रमाणं द्वितीयप्रत्ययग्रहणमिति भाष्यकृतः अन्यथा तल्लक्षणमित्यवक्ष्यदेतः इति तदाश
यं कैयटः प्रकृतेतत्पदप्रत्ययपदयोः पर्य्यायत्वेपि प्रत्यासत्तिः प्रार्थनीयस्याप्रार्थितस्यैव लाभायद् इति लाघवमिति तदाशयः वस्तुतस्तुन
तच्छब्दः कस्यचित्पर्य्याय इति मंजूषायां सिद्धान्तितम् उद्द्योते यत्तु पर्य्यायत्वमुक्तं तत्तु केचिदाहुरित्युक्त्यास्वरसान्तरमिति बोध्यम् ततोपि
लाघवमभिप्रेत्य स्थानिवत्वप्रवृत्तिरेवकार्य्येति तदाशयं कौस्तुभं कृतः॥ बहुव्रीहिलभ्य फलस्य न खभिन्न इत्यादेरन्यथासिद्धत्वादेवमुक्तमि
ति॥ तदाशयः नन्वेवं कात्स्न्यासाधारण्ययोर्विवक्षा येद्वयोरपि प्रत्ययपदयोः सामर्थ्यवर्णनीयं तच्चासंभवि लोपेस्थानि दद्दित्युक्तावतिप्रसङ्गस्य रामः
तत्वात् उभयोरप्यभावे प्रत्यात्तेरप्युक्तस्यवक्तुमशक्यत्वात् तृतीयस्य च प्रत्ययपदस्य भगवता प्रत्याख्यानात् तथाच कौस्तुभभाष्यस्यारायद्दति १०१
चेदयम् तावन्मात्रफलकत्वेमत्वर्थीयर्वायत्नप्रतिपत्तिलाघवायच क्तप्रत्ययलोपेद्दत्येवब्रूयात् इति न चैवमपि प्रत्ययग्रहणसामर्थ्यादवधारणा
न्तर्भावेणसमासे ऽसाधारण्यं लभ्य॥ स्वसमानाधिकरणावर्णविशेषत्वरूपं प्रत्ययस्य प्राधान्यं दुर्लभम् तं विनापि तस्य चारितार्थ्यात् एवंचचित्रापाजा

त्वाचित्राद्यत्वादावनिष्टङीवादिविधावुक्तन्त्वेवास्यस्यान्तनियामकत्वमितिचेन्न अकारान्तायोटिदादयः तदन्तंयत्प्रातिपदिकंतदन्तादितित-
दर्थाङ्गीकारेणानन्विधाविव्यनुवृत्तेर्विधिपरत्वद्व वविशेषणसामर्थ्यात् श्रूयमाणाकारान्तादित्यर्थाङ्गीकाराद्वा तत्रास्याप्रवृत्तेः स्पष्टश्चायमन्त्यः
ः प्रकारः प्रकृतसूत्रेकेयटे असिसिचेरक्तइतिसूत्रेशेखरेच नचान्त्यपदेसंग्रामारज्जुरित्यत्र ङीवर्थंनतुमानाजितिप्रत्याहारनिर्देशादितिसिद्धा
न्तेकतिस्त्रियइत्येतद्वारणायावश्यकत्वेनान्यत्रइचात्रसामर्थ्याभावादितिवाच्यम् नषडितिनिषेधेनापिकर्तीत्यस्यसुसाधुत्वात् अतएवाश्व
णोत्यादिनिर्देशेनउक्तप्राधान्यस्यताभइतिदिक् तत्रैवेतीति तदेतियुक्तम् अन्यत्रेति यङ्लुङन्तशेखरइत्यर्थः एवंपास्पर्द्धीतिवक्तव्येवेसिदीनी
तिउक्तमात्रमेकदेशिमोन्यत्सर्वसिद्धान्तिनइतिबोध्यम् ॥ नलुमताङ्गस्यतदुद्देश्यकमिति तत्पूर्वत्वेनतदुद्देश्यकमित्यर्थः अन्यथाकृवन्तत्वेन
तत्पूर्वभागस्यराजनित्यस्योद्देश्यतासत्वात् राजपुरुषेपदत्वंनस्यादितिबोध्यम् संज्ञाचनेति आद्यपक्षेइतिशेषः जातुमतिष्ठतीति वक्ष्यमाणरी
त्याजातोपिलुकितत्प्रवृत्त्यालुकोऽन्तरङ्गाङ्गसंज्ञानिमित्तविनाशकत्वाभावेनतत्रकर्तव्यायांतत्न्यायाप्रवृत्तेरितिभावः ॥ असंज्ञायांतुलुकि
कृतेनलुमतेतिनिषेधात्प्रवृत्त्यातद्रूपान्तरंगनिमित्तविनाशकत्वंलुकोस्त्येवेति तत्रकर्तव्यायांतन्न्यायाप्रवृत्तिरितिबोध्यम् स्त्रीप्रत्ययेति गो
रवादिभ्यः ॥ स्त्रियांचेतिसूत्रेभाष्यकारैकदेशिनः तृज्वत्वमिति जातुमतिष्ठतीतिभावः अङ्गसंज्ञायांनलुमतेत्यस्याप्रवृत्तेरेवंचलुकोऽन्तरङ्गसंज्ञा
निमित्तविनाशकत्वाभावादन्तरङ्गत्वापीतिन्यायाप्रवृत्तेः पूर्वमङ्गसंज्ञायांतृज्वत्वेङीवादिरितिभावः ॥ स्वमोर्नपुंसकादिति सूत्रेइति कृत्यनुव

तेमानेनेतराच्छन्दसीतिसूत्रेइत्यर्थः। त्रेस्त्रयः। शंकावारणायेति। तत्रापिन्यासेउक्तनिर्देशाश्रयणेतुजरायाअसुङीवप्रतिपत्तिगौरवमिति भावः॥ ॥
स.भ. इत्थम्भूवकारेति। अस्यतथेत्यादिः आदावितिफलितार्थकथनंभाष्यवकारप्रतिषेधइत्येवत्रिरुक्तेः आवश्यकमितीति इदमपिसंभावनामात्रेणइतिशेषः
११० अत्रपक्षचतुष्टयमुपलभ्यते तत्रावकारेप्रतिषेधइतिवार्तिकारम्भएवज्यायान् अन्यथाशंस्याशब्देप्रत्ययलक्षणेनअतृणेडितित्यत्रेवेत्वापत्ते
रित्येकः। प्रत्याख्यानमेकदेश्युक्तिरिति प्रत्ययलक्षणसूत्रंचवार्तिकानारम्भेप्रकृतेऽनिष्टत्वसिद्ध्यर्थमेवस्याद्यथोत्तरंमुनीनांप्रामाण्यात्तुक्विपी
त्वंभवत्येवहलीत्यस्यानचीत्यर्थकत्वात्शंस्याशब्देविजेवभाष्यप्रयोगादीत्वाभावइतिद्वितीयः वार्तिकानारम्भणीयामस्त्विधाविति प्रत्ययल
क्षणसूत्रेऽनुवर्तनीयमितिक्विपीत्त्वंनैवप्राप्नोतिदधातेर्विनित्तुएकदेश्युक्तिरेव यत्तुइग्रहणादपूर्वत्वाशयकत्त्वंतस्यजीर्यतेर्घ्युरित्यस्येवेत्या
हुरितितन्नसम्यक् एवमपिजग्ध्सनेनेतिसूत्रेधियोधियइत्यत्रेयङित्त्वस्याभीसिद्धत्वसुनभवति क्विपीत्त्वविभक्ताविमयङितिष्वाश्रयत्वादितिभा
ष्योक्तेरसंगत्यापत्तेरितितृतीयः ईत्वविषयेक्विवचनेनेतिचतुर्थः तस्यायंभावः एवमितिवार्तिककारस्यप्रत्याख्यानयोः फलैक्यंसंपद्यतेअनत्विधा
वित्यस्यस्वरितत्त्वप्रतिज्ञामण्डूकानुवृत्तिर्वानैवप्रत्ययलक्षणसूत्रेनियमार्थत्वंचासंस्याशब्देचक्विपमङ्गीकृत्यवार्तिकारंभावश्यकत्वकल्पनां राम:
भाष्यकारप्रयोगादीत्वाभावकल्पनांत्वपेक्ष्यः क्वचेतिसूत्रस्थस्वरितत्वप्रतिज्ञाकंविचः पदमेवानुवर्ततेनात्रस्वरितत्वप्रतिज्ञाकंक्विप्य ११०
इमपीयमेवकल्पनायुक्तातत्रस्थक्विप्यपीदंतुवार्तिकानुसारिणइति युक्तम्भाष्यंक्विविधायकेइग्रहणनक्वित्वप्रयुक्तकार्यादर्शनेसंनद्ध

श्यतेइत्यस्यैव युक्तत्वादिति बोध्यम्। स्पष्टश्चेदं सर्वं वपुमेति सूत्रे भाष्यप्रदीपोद्द्योतेषु इति दिक्। पर्यालोचनया सिद्धादिति इदं च निवर्थप्राधान्य
र्थस्त्रीत्वांशे षं तु वार्त्तिकं शेषे उपर्लभ्यत इति बोध्यम्॥ ह्रस्व इति कपूर्वेति शेषः॥ यूस्त्र्याख्यौ नदी। तदवयवे लक्षणेति। शकन्तस्याङ्ग संज्ञायां निमित्तं
भूतेन य्वयवे इत्यर्थः। तेन तुदन्तु गौरीत्यत्र न दोषः। नचैवमपि शत्रन्तानामन्तुपि वन्तुदन्तीत्यत्र दोषः एवमनुपस्तदङ्गसंज्ञानिमित्तमान्नत्वयव-
त्वाच्च न चेष्टापत्तिः वर्णसंज्ञापक्षेऽप्राप्तिरिति चेन्न शीसाहचर्येणाकारप्रश्लेषेण वा ईकाररूपेन य्वयवे इत्यर्थाङ्गीकारात्। नन्वेवमपि तुदन्ते हि तं
तुदन्तीयं तमतति तुदन्तीयात्। तमाचष्टे इति णिचि टिलोपे यलोपे तुदती। ततो मन्तुपि डीपि तुदतीमतीत्यत्र दोष एवेति चेन्न। वर्णसंज्ञाप
क्षेपि तत्र प्राप्त्याद्युष्टापत्तेः अतएव शीङ्ग्यारिति नासुत्रियदित्तत्रनुमोनिष्ठत्वे मानमुपलभ्यते॥ तदांचरमावयवे लक्षणेति बोध्यम्॥ आख्या
ग्रहणादिति विचूपक्षे इदं कपक्षे तु रव्यग्रहणेति युक्तम्॥ अनभिधायकत्वेति। येन प्रवृत्तिनिमित्तेन लिङ्गान्तं सं वेशिष्ट्येन स्वेनार्थोभिधीय
तेर्थस्तत्प्रकारकबोधजनने च्छयोच्चरितं तत्त्वं यदा स्वस्य तदा नित्यस्त्रीत्वं   मिति यावत्। यस्य नदीसंज्ञा चिकीर्षिता स स्वपरार्थ इति बो-
ध्यम्॥ त्रिलिङ्गेनेति। नपुंसके ह्रस्वात्प्राक् समानाकारत्वमिति बोध्यम्॥ ॥स्त्र्यस्त्रूति॥ अनुवर्त्तते इति। सुप्तिङिति सूत्रादिति शेषः। अपचीति। प्रसंख्याति इव
श्चात्सर्वनामस्थाने इत्यत्रेत्यनन्तरसम्बन्धमभिप्रेत्येति। इदमपि निषेधार्थकोऽशाब्दमभिप्रेत्य स्वादिषु पूर्वं पदं भवति ततो यजादावसर्वनामस्थाने परे
मध्ये वेत्रसुवन्तं तदपि पदं भवतीति वाक्यद्वयेन सुवाचेत्यादिसिद्धौ वाक्यत्रयकल्पना चिन्त्या। गवं च सोपरे फलभेदेनो ऽयपरमनुकूलं संभवतीत्यादोशपुपप

स·भ· दपूर्वसुवन्तभूशब्दादाचारक्विवन्तात्लुङ्टित्तिपिशपिगुणोपूर्वरूपमपिनयजादित्यादिशस्यप्रकारवाचित्वेनशपोपियजदित्यादिनिएवंसजनतीत्यादिवाध्य
१११ म्·गोतोणित्·विपरिणम्यतेइति·णित्कार्य्यमिति·एवंचणिच्छब्दस्यणिदितिलक्षणेत्यर्थः।वस्तुतःसप्तम्यन्तमेवास्तुगोतइतितुषष्ठ्यन्तंणिच्छब्दस्यणिन्निमि
त्तककार्य्यलक्षणाएवंचसर्वनामस्थानेपरेगोशब्दस्यणिन्निमित्तककार्य्यंभवतीत्यर्थइतीदंचिन्त्यम् नदोषइति हेचित्रगोइत्यत्रनदोषः विहितविशेषणे।
स्यवक्ष्यमाणत्वात्॥इत्याहुरिति गामित्यत्रवृद्धिस्तुन॥इत्यजन्ताःपुल्लिङ्गाः॥रमेतिक्रीडार्थकरमधातोःपचाद्यचिसाधुःस्यादित्यइति·आवन्तत्वायपूर्वान्त
वद्भावस्यावश्यकत्वेनततएवस्वादिसिद्धिरितिभावः एतेनवाचेत्यस्यसिद्ध्यर्थंलिङ्ग·विशिष्टपरिभाषासंचारस्यावश्यकत्वात् प्रकृतेपितयैवसिद्धेपूर्वान्तवद्भा
वोद्भावनेचिन्त्यंप्रयोजनमित्यपास्तम्· प्रतिपदोक्तत्वेनेति·नाप्राप्तलोपेऽस्यवाधकत्वादित्यर्थः॥एतेन्लोपेपिआपइतिप्रतिपदोक्तत्वेनतत्वाह्लोपस्येत्यपास्त
म्· अनित्यत्वादिति· भाष्योक्तपरिगणनस्यतुपरिभाषास्वीकारेतात्पर्य्येनतुपरिगणनेनहिभिक्षुकाःसन्तीतिदृष्टान्तेनतथैवलाभात् ध्वनितश्चेदमितोन्य
त्राप्रवृत्तिरितिवदताइतोन्यत्रेत्यत्ररुत्वेउत्वेगुणेएङःपदान्तादितिकुर्वताभाष्यकारेण· अथाऽकारनिमित्तकत्वेनात्वस्यगुणद्वारापूर्वस्यपातद्विघातक
त्वात्तदसंगतिःस्पष्टैव॥सर्वनाम्नःस्या· असंभवादिति· त्युस्युलोःतुट्चेत्यादौतु[illegible]योरंवृत्तिसत्तामप्योश्चतत्रोद्देश्यत्वंयुष्मद्युपपदेइत्यत्रतुतिङ्·ग्रह राम:
णांतत्स्थानिकलकारेलाक्षणिकम् आपोह्रस्वश्चेति·इदश्चह्रस्वपदश्रुत्याअचूपरिभाषोपस्थित्याआपइत्यावन्तात्सर्वनाम्नःपरस्यङितःस्याट् अचश्चह्र १११
स्वःसचालोऽन्त्यपरिभाषयाऽन्त्यस्यैवस्यात्तत्फलितार्थकथनमापोह्रस्वइति·एतेनापइत्यस्यावृत्तिपरंलापनश्चित्यम्॥आहुरिति· विभक्तौलिङ्ग·विशि

छेतिनिषेधः स्यादेवनत्स्य अनडुही अस्त्रमनडुहः स्त्रियामिति वार्तिकेनाम् विकल्पेन त्वाभावार्थविभक्तिप्रयोजककार्य्ये इत्यर्थ आवश्यक इति अत्रापि ते

नैव निषेधः कुतो न स्यादिति चिन्त्यमेतत् उद्देश्यत्वविधेयत्वप्रतीत्येति एवञ्च पर्व्वतो वह्निमानित्यादावुद्देश्यविशेष्यत्वं विधे—स्य प्रकारतास्यात्

इतीदं चिन्त्यम् एवञ्च पूर्व्वोऽशब्दस्य पूर्व्वत्वप्रकारकज्ञानलक्षणया पूर्व्वत्वप्रकारकज्ञानविशेष्यासामासिद्धोजरेत्येव परमप्राचीनोक्तं पूर्व्वोजरेत्येव युक्त

म् न विधेयपरः शब्दार्थः इत्यपि चिन्त्यम् आयुर्वैघृतमित्यादौ घृतमायुर्ज्जनकमित्यर्थे विधेयायुःशब्दस्य लक्षणया दुष्टत्वात् संदिग्धप्रमाणवक इत्या

दौ विधेयसिंहशब्दस्य सिंहसदृशे लक्षणायाः स्वयमुक्तेश्च नियमेति ॥ अत्र द्व्यक्षरमित्यस्य शब्दस्य विशेषणत्वेनोपपत्तौ नियमपरतया व्या

ख्यानं क्लिष्टम् भक्त्येवेति पुनष्टापूत्तुन भवति वहिरङ्गासिद्धत्वात् उक्तमिति एवं चेन्निर्जरसे निर्जरसे इत्येव भवितव्यमिति भाष्यविरोधात् पूर्व्व

विप्रतिषेधेन जरसइत्येवोचितमिति निर्जरशब्दस्य शेखरश्चिन्त्य एवेति स्वश्रूयमाणेति स्वमादेशत्वमिति वक्तुं युक्तम् अकारश्रयमाकारत्वमित्यर्थे पोनरुक्त्यं स्या

त् वक्ष्यमाणरीत्येति साच परंपरासम्बन्धेन स्थानिनिष्ठधर्म्मस्य नातिदेश इत्येवंरूपा एवं चेद्धात्वन्नयकोऽस्तु नित्यं सुनर्थिका अत्र नीधौतां गुणाअयादेशे धा

तुलंशिवोऽर्थ्य इत्यत्र पूर्वरूपम् आरतुः आरुरित्यादावसंयोगाल्लिट् कित् इति कित्वन्न स्यात् मध्ये किंचित्कार्य्याभावेन तद्धर्म्मो नातिदेशादिति इ

मपि चिन्त्यमेव भावश्चेति पाठः लौकिकमिति नञ्च वाक्यार्थवत्वे सति सार्थविशिष्टार्थान्तरबोधकत्वरूपं न इतरविशेषणत्वरूपं दोषस्यात् कत्वेन

सर्व्वलोपसज्ञेन स्येवसत्त्वात् इदं च समासे एव वाक्ये तु न तेन सर्व्वस्मै पुरुषायेत्यादौ न दोषः त्वासंभवादिति तन्मात्र लौकिकोपसर्जनं त्वनुस्त्री प्र—

स॰ भ॰ त्ययान्तघटितत्वात् बोध्यम् यद्यप्येतादृशोपसर्जनत्वं यत्रोदाहरणे न तत्र तदादिनियमप्रसक्तिः न तत्रोपसर्जनत्वं तथापि परिभाषाया अनुपसर्ज्जनस्त्रीप्र
११२ त्ययोपस्थापकस्त्रीप्रत्यये तदादिनियमो नेत्यर्थात् ननु अस्य स्त्री इत्यर्थेऽशब्दात् ङीषि यस्येति चेति लोपे ई इति जस्य निरशब्देन समासे लुक् विभक्तिचे
तिप्रत्ययमात्रस्य शास्त्रीयोपसर्ज्जनत्वसम्भवइति नच फलाभाव ह्रस्वस्तु स्वम्नपुंसकस्यादेव उपसर्ज्जनस्त्रीप्रत्ययान्तप्रातिपदिकादिति वाच्यम् स्त्रीभ्यो ढ
गिति निरिशब्दस्य स्त्रीप्रत्ययान्तत्वे ढकि आदिवृद्धिरिति चेन्न स्त्रीभ्यो ढगित्यस्य स्त्रीत्वरूपार्थवाचकाड्ढगित्यर्थस्यैव वक्ष्यमाणत्वेन निरिरित्यस्य तत्त्वाभा
वात् तदप्राप्तेः वस्तुतस्तु कुम्भकारेयो प्याद्यते स्त्रीभ्यो ढगिति ढोऽत्र प्राप्नोतीति भाष्यविरोधाच्चिन्त्यमिदं तत्र शेखरोपि चिन्त्य एवं मातृष्वसेयइत्यादि तु
पृषोदरादित्वाद्बोध्यम् नतेनेति॥ तेन स्त्री॥ प्रत्ययान्तेन किंतु स्त्रीप्रत्यय एव तदादिनियमः प्राप्तइति तत्रैव निषेध उचित इति भावः वस्तुतः शास्त्रीयोपस
र्ज्जनत्वमेव स्त्रीप्रत्ययान्ते इति बोध्यम् तत्र तदादिनियमप्रसक्तिस्तु नवानुपसर्ज्जनस्त्रीप्रत्ययोपस्थापकस्त्रीप्रत्यये इवानुपसर्जनस्त्रीप्रत्ययान्तघ
टकस्त्रीप्रत्ययोपस्थाप्यस्त्रीप्रत्ययान्ते बोध्या॰ अत एव कृत्रिमाकृत्रिमन्यायस्यानाश्रयणात् प्रत्याश्रयणाच्च अत एवाइन्नपुंसकमित्येकशेषिसमासप्रत्या
ख्यानपरभाष्येण फलभेदः स्वमते तत्राईपि पिप्पल्यादौ कर्मधारयाश्रयणेन भाष्यकृता प्रत्याख्यानं तत्रातः स्मरेलौकिकोपसर्ज्जनत्वेन ह्रस्वेन प्रत्याख्याने रामः
त्वनुपसर्ज्जनत्वाद्ध्रस्वः स्यादेवेति भ्रमस्तु पूर्वमिदानीं च शास्त्रीयोपसर्ज्जनत्वाभावान्न ह्रस्व इति निशायामिति हलन्तादापेनभिधाने तु वहु यज्वा स्या ११२
मित्यादि बोध्यम्॥ सखादि॥ एकं त्वनिरवद्यायेत्यत्र ह्रस्वानपूर्वमाकारसत्त्वेन कथं तस्य लाक्षणिकत्वम् किंच तत्तच्छब्दानुवादेन विहितत्वरूपप्रतिप

दोक्तत्वस्यासत्वेनकथंपरिभाषयावारणमितिचिन्त्यमेतत् तस्माद्दतिखट्वायेत्यत्रयकारमुपजीव्यजायमानोदीर्घः यकारसन्निपातविघातकयाटन्नत्र
वर्त्तयतिइतिसन्निपातपरिभाषयावारणंवोध्यम्॥ मानाभावादिति· अत्रयत्वक्तव्यंतदुक्तंप्राक् व्रश्च विभ्राडित्येवेत्याहुरिति एवंचेत् भ्राशे
विभ्राडिति भ्राजोविभ्राडिति रूपद्वयसिद्धौ भ्राजिग्रहणंव्यर्थंकिंचाएकानुबंधकस्जिसाहचर्यादेकानुबंधकभ्राजेरेवकुतोनग्रहणं तथाच
फणादेः षत्वन्नस्यादितिसाहचर्य्यंचिन्त्यम् अविचार्य्येइतितुच्छेदइतितुनसम्यक् अविचारेयुक्तिस्तुपूर्वोक्तैव॥ङितिह्रस्वश्चेतिद्वयमिति॥ अत
एवसूत्रेचः ओदेदित्यस्यतन्त्रइत्यादिः ह्रस्वयोरप्राप्तेइति तन्त्रसूत्रस्थस्य ग्रहणपक्षस्यापिभाष्येउक्तत्वात्क्समनीतिरितिवा
च्यम्। तत्रैवपक्षेशेषपदमकृत्वापरत्वात् घिसंज्ञायाबाधइत्यस्याप्युक्तत्वेनादोषात् नेषधादित्वेनचदीर्घबाधकं व्यङितिनिवृत्त्यो
भयत्रविभाषात्वमेवकुतोनेतिवाच्यम्· भावमात्रतात्पर्य्यलाघवानुरोधेनाप्राप्तविभाषात्वस्यैवौचित्यात् उभयत्रकल्पनातएककल्पनेलाघ
वस्यवाक्ययोःसाम्यस्यचसत्वात्॥ह्रस्वांशेति· इष्टा युपक्रमानुरोधादेकदेशावृत्तेरयुक्तत्वात् भाष्येह्रस्वघटितवाक्यस्यख्याख्याविरहस्यकरणत उ
क्तत्वाच्चाहयदेतिङिदास्विपेति इदंप्राचीनवासनयावस्तुतः प्रत्ययग्रहणपरिभाषयानलाभः नेदंप्रत्ययमात्रग्रहणमिमितिचेन्न नामीतिसाहचर्य्ये
णतन्मात्रग्रहणात् अतएवहेगौरिशेतेऽयम् इत्यादौनदीत्वविकल्पोनेअत्रङितिह्रस्वश्चेतिसूत्रविषये अन्वाख्यायकेइति अस्त्विदमपूर्व
मितिभावः अतएवतदाचार्य्यैः मृद्दत्तभूत्वान्वाचष्टेइत्युक्तंह्रस्वोह्रस्ववर्णाद्यन्तोशब्दोइयङादिस्थानेवर्णाद्यन्तौचतावित्यर्थः मृद्वी प्रवृत्तिर-

र्थान्तरसंक्रान्तिः तस्यां सत्यामिति कैयटः ननु पुंवाचकेति यद्यपीदं न भाष्ये तथापि नपुंसके नुमा बाधात् फलतीति वार्तिक इति इत्यर्थे कवार्तिकव्याख्यानाव
स॰ भ॰ सरैइत्यर्थः ङिदास्तीति · यतो ङिद्धिहितत्वं दादित्वाभावादित्युद्योते नोक्तमत एवाशयोऽस्य मुख्यार्थोन्तरसंक्रमः अङ्गस्येवेति भावः अशिति इति ·
११३ ह्रस्वेति वार्तिकव्याख्यानभाष्य इति भावः अजानत इति अन्यथा ह्रस्वावित्यस्य नियमार्थतानवच्छेदात् उभयलिङ्गादौ विध्यर्थत्वसंभवात् एकदे
शीत्युक्तहेतोर्गौरवाच्चास्य नत्वमिति भावः तदन्तस्यैवेति तेन कटप्रुवे ब्राह्मण्यै इत्यत्र न नदीत्वं श्रियै ब्राह्मण्यै इत्यत्र नदीसंज्ञा अत एव प्रकृतौ च
प्राक् च प्रवृत्तेऽस्त्रीवचनावेवेति भाष्य उक्तमिति भावः नदत्वाभावादिति स्त्रीवचनावित्येव भाष्योक्तः उक्तप्रयोगाणामनभिधानाच्च अत एवोक्तवार्ति-
कं च दूषयत्यहितम् अपर आहेत्यादिना पठित्वा कृन्मेजन्त इत्यनिकारोकारप्रकृतिरिति रन्तव्यम् कृतिरिति नियमात् व्यमित्यादः विवन्त्वाय्य विचारोनत्र
तो भाष्यकृता कैयटेनाप्युक्तः स्वशब्दो त्रतन्मतेन इति पूर्वस्माद्विशेषः नन्वेवं प्राक् प्रवृत्तेः किमेवं दनिष्टमापद्यते ब्राह्मण्ये इति न सिद्ध्येत् अन्ते तद निवेश
श्रन्यांशेनये अतिप्रये ब्राह्मण्यै इति न सिद्ध्येत् अयमेव च चकारमपठतो वार्तिककारस्याशयः नहि प्राक् प्रवृत्तेः किंचिदनिष्टमापद्यत इति कैयटस्य चाश रामः
यः नित्यस्त्रीवचनस्य स्त्रीवचनत्वान्यभिचार इति आद्यवाक्ये नित्यस्त्रीत्वनिवेशादेवापक्रमे निषेधपरतया व्याख्यानेन फलभेदः तदुक्तनित्यस्त्रीत्वा ११३
र्थभजानन्त एकदेशयुक्तिस्तु साहसमात्रम्॥ साधकान्तरभाष्याभावात् विपरीतस्यापि वक्तुं शक्यत्वाच्च अतिश्रिये आज्ञिभुवे इत्यत्र सोत्तदन्तविधिनोपपन्नंस्य
आंशेन त्रिविशादेव युइति · ह्रस्वयोर्वहव्यमिति पक्षे ह्रस्वश्चेत्यस्य नियमार्थतासिद्धान्तिता · अत एवाकडारसूत्रे एतास्तु तारम्भसामर्थ्यान्नदी

संज्ञामात्रविशेषग्रहणं न कर्तव्यमित्युक्तम् अन्यथा गवां पत्यै स्त्रियै इदं त्यादौ चारितार्थ्यात् सामर्थ्योक्तिरसंगतैव स्यात् नित्यस्त्रीत्वं च वार्तिककृन्मतं
मतम् बन्धुदेवेति शाकटायनेनैवेति स्वरसतो लुवन्तविषयकमपि भाष्यं तु योजम् प्रतिषेधपरतया व्याख्यानस्यैकदेशयुक्तत्वं तु नैव युक्तम् अवय
वविषयत्वात् सिद्धमिति चेत् यङ्‌ वङ्‌ स्थानिप्रतिषेधे यण्स्थानिप्रतिषेधो वयवं स्यौ यङ्‌ स्थानत्वादिति वार्तिकप्रतिषेधवृत्तु केरिति दिगित्याहुः
॥ङिति ह्रस्वश्चेति॥ सूत्रस्य व्याख्यान्तरं ङिति ह्रस्वश्च यन्नुवाचि ह्रस्वश्चेत्येव सूत्रेण सिद्धे ङिति ह्रस्वश्च वामिति सूत्रद्वयं व्यर्थमिति तत्सामर्थ्यात् स्थानि
पातपरिभाषाया अनित्यत्वज्ञापनार्थमिति तन्न यदागमपरिभाषायां समन्ते वर्णग्रहणेपि ... न्याद्यादित्वान्निर्देशादिमाति देशोन विघाताभा
वेपि वस्तुतः सन्निपातसत्त्वात् न च प्रत्ययग्रहणपरिभाषया तदादेरित्यस्योपस्थित्या एङ्‌ ह्रस्वादित्यादाविवाङ्‌ लाभ इति वाच्यम् नेदं प्रत्ययमात्र
ग्रहणमिति सूत्रान्तरसाहचर्यात्तु स्वयमेवान्यत्र व्यवस्थितम् किं त्वीकयुक्तात् तदादेरित्यस्यालाभेप्यत्र समस्तप्रत्ययस्याश्रयणेपि न षष्ठ्यन्तता तदा
देरित्यस्योपस्थितिः स्थानेन च ह्रस्वपदेन सामानाधिकरण्यस्य नैवं संभवतीत्यष्टम् चेदं परं च तत्र पंचम्यन्तता वृत्त्यादिना परिभाषेन्दुशेखरे त्वस्माभि वार्तिकानुत्या
नत्र किं स्वाङ्ग विशेषणत्वेकटप्रवेत्राय ... इत्यस्य परित्यागः किमर्थकृत इति शंकाद्वुरुद्वराच प्रथमलिङ्गग्रहणं चेत्यस्य स्वरकुत्स्य इति ... संगच्छते
विभक्तिविपरिणामेनेति शब्दाधिकारेणापीति ह्रस्वयोरपि संभवात् तयोर्ग्रहणस्य विभक्तिविपरिणामे ह्रस्वस्येत्यत्रान्वयः॥ दिगिति॥ जिसंज्ञा तस्य इत्य
त्र विभक्तिविपरिणामे नोभयानुवृत्त्यात्रिवत्तु स्थानिकयोः सिस्च तन्त्रो रादेशो भवतीत्यनेन ... इति स्पष्टार्थमिति दिग् ... एतेनेति पूर्ववि

स० भ० प्रतिषेधकरणेनेत्यर्थः १८ ऋयादेशाद् इति· तत्रादेशे दीर्घे तदसंगतिरिति भावः उत्तरपदत्वाभावादिति ऋकारान्तोत्तरपदकबहुव्रीहावित्यर्थः एतेन
११८ बहुमातृकद् इत्यादि तदुदाहरणेषु समासान्तः अलौकिकप्रक्रियावाक्ये बहुजस्मातृजस् इत्यत्रैव प्रवृत्त्या तत्र ऋकारान्तोत्तरपदत्वाभावादित्यपा
स्तम् सूत्रान्तरसामर्थ्यमपूर्वोक्तार्थोङीकारात्। नेयङुवङ्स्थानावाधकाविषय इति· इदं च स्वरूपकथनं न तु पूर्वं यणा उवङोपवादत्वोक्तस्यैतत्प्र
वृत्तेः तयोरिति अत्र स्थानिनोऽधिकरणत्वविवक्षया सप्तमी व्याख्यानादिति सूत्रारम्भसामर्थ्यादित्यर्थः हे श्री रित्यादाविति इयङुवङोः क्वापि
स्थित्यभावात्। नदीकार्याप्रयेऽङे इति सुधीत्यत्र सुसुधीसु इति स्थिते समासान्तस्यालौकिकप्रक्रियावाक्ये प्रवृत्त्या तत्र सुवन्ते नदीकार्याप्रयेः
ङे इयङुवङोः स्थितिः क्वापि न दृष्टा इति तत्र निषेधाभावे सूत्रव्याख्याविरत्यनेन नदीसंज्ञायां प्रसूयात् किं चैकत्र गृहे काकदर्शने अन्यत्र गृ
हे काकवत्तो देवदत्तस्य गृहा इति भवती त्युपलक्षणताप्यशक्येति चिन्त्यमेतत् तस्माद्यदर्थकेष्वदृशधर्मावच्छिन्ने इयङुवङोः स्थितिर्दृष्टा
तदर्थकत्वद्रूपावच्छिन्नस्येत्यादिशब्दार्थो वक्तुं युक्त इत्यलम्· सीतापहारेति अत्र दृक् योगात् असमासस्य निषेधात् सीतायां अपहारेति वक्तुं
युक्तं विधिनेति विधिना त्वयोहापितः त्याजितः किं कुर्वः हे सुमन्तुत्वं कासिद्र त्वं वंसदृष्ट विलनासि त्याजनानन्तु त्याजितः म इति त्वयेत्यस्यान
न्वयापत्तेः भावप्रकाशे तु विधिना त्वयाहापितः त्याजितः सलक्ष्मणः हे सुमन्तुत्वं कासीत्यंवं वंकविललापेत्यर्थः इत्युक्तम् तत्र लक्ष्मणस्यविला रामः
पे कर्तृत्वेनान्वयः रामविलापोऽयमिति स्वपरग्रंथविरोधात् किंत्वयमप्येको विलापप्रकार इति बोध्यम् परन्तु तच्छब्देन लक्ष्मणपरान ११८

र्गो दुर्लभः । अस्याप्रक्रान्तत्वात् रामइत्यस्यैव विलापेकर्तृत्वेनान्वयित्वस्यैव स्वरसतः प्रतीतेश्च परंत्वयमप्यानप्रकरणस्यानुगुणानापि तत्पदं-
व्याख्यायाः तथाहि षष्ठसर्गे एकादशं भट्टिपद्यम् आः कष्टं वत्स हि चित्रं हुं मातर्दैवतानि धिक् हा पितः क्वासि हे सुभ्रु वत्सेवंविललापसः शोकेना-
क्रान्तमनाविकल्पं नाद आः इति पीडायां तापि वियोगात्पीडितः आ इत्याह अस्माद्धि [illegible]मात्रात् पिता प्राणांस्त्यक्तवान् इत्याह कष्टं कृच्छ्रमि-
ति भर्तृमरणादसह्यवियोगाच्च मातुः कावस्थेत्यभिप्रायेणाह वत्सेति प्रतशब्दः खेदे सौमित्रिरपि सीतया शायितइति विस्मितः हीत्याह हि विस्म-
ये यदि नाम मूढस्तयापि शायितः सीतया तथापि सौमित्रिणा विदुषा तां पि कथं तां दशापादि[illegible] अभिप्रायेणाह चित्रमिति । चित्रमाश्चर्यं
पदेवंविधमनर्थजातं तत् कैकयीप्रभवमिति क्रुध्यन् हुं मातरित्याह हुंशब्दः क्रोधे अयं [illegible]मेव इदं दैवतविचेष्टितमिति तेन च तेषु मया-
नुचितमित्यभिप्रायेण धिक् दैवतानीत्याह । धिक् कुत्सायां प्राणांस्त्यक्तवन्तमपि पितरं न पुनरहं द्रक्ष्यामीत्यभिप्रायेणाह हा पितः क्वरुष्ठो-
ऽसि हा शोके हे सुभ्रु सीते क्वासीत्यादि तद्व्याख्यानस्त्वेति वोध्यम् समुदायस्य चेति इदस्त्वपदान्तरम्विनापि स्त्रियाम्वर्त्तमानत्वं नित्यस्त्रीत्व-
मिति वृत्तिकारस्तनमनुसृत्यउक्तम् केचित्तु शोभने भ्रुवौ यस्या इति बहुव्रीहिः शोभनं भ्रमतीति तत्पुरुषस्य वा नित्यस्त्रीत्वाभावान्नदीत्व-
प्राप्तिरेवनेति वोध्यम् भावप्रकाशे तु जयमङ्गलादौ भ्रुशब्दात् प्राणिजातित्वेत्यूङ् तदन्तेन समासे उपसर्जनह्रस्वे कृते पि मनुष्य-
जातिवचनत्वेन पुनरूङ् तदित्यूङ्पूर्वान्तत्वेन प्रातिपदिकत्वे सति सम्बुद्धौ ह्रस्वत्वम् ऊङ्भावे तु दीर्घत्वम् इत्युक्तम् ऊङ् चामायादीनामिति

स॰भ॰ व्युत्पादितस्य क्रियाशब्दत्वाज्जातिवाचकत्वाभावेनोङ् संभवति अव्युत्पन्नस्य ऊङ्प्रत्ययान्तस्य वा शुद्धरूढस्य प्राण्यङ्ग वाचकस्य तु जातिवाच
११५ कत्वादूङ् भवति तथा च धातुत्वाभावादुवङभावे सवर्णदीर्घे भ्रूः इति भ्रूग्रहणेन तु नोवङ् तत्र धातुसाहचर्येण तस्यापि धातुसंज्ञकस्यैव ग्रह
णात् अत एव कैयटेन प्रत्याख्यातं कपूत्तु नसमासान्तविधेरनित्यत्वात् क्विबन्तप्राण्यङ्ग योगरूढिस्त्रीकारादमरे भ्रूर्वोस्त्रियामिति प्राण्यङ्ग
कत्वमप्युपपन्नं तत्राप्यूङ् तु न प्रजातिपर्युदासेन भ्रूरूढेभ्य एव तदुत्पत्तेरिति ॥ ॥ इत्यजन्ताः स्त्रीलिंगाः ॥ अद्ड उतरादिभ्य इति एतद्भा
ष्यप्रवृत्तेरिति एवं चेच्चतुरारम्भप्रत्याख्यानयोः फलभेदे सूत्रानभिधानं किमर्थं क्रियते फलान्तरसूचनायैव तद्भाष्यप्रवृत्तेरित्यस्य वक्तुं शक्य
त्वात् वस्तुतः कर्तोर्धर्तोरित्यादौ सुनिमित्तानडि संनिपातपरिभाषा विरोधात् सुलोपोऽनस्थाने इति तदर्थं विभक्तित्वेपि तदनित्यत्वज्ञापनीयमेव
अत्रापि विभक्तिलोपे तदनित्यत्वान्न दोष इति चिन्त्यमेतत् विहितविशेषणेपि इति तु प्राचीनमतेन षडर्थगतसंख्याभिधायि रूपं विहितत्व
मित्युच्यते तेन दातॄषामपि न विरोधः ॥ सान्तमहतः संयोगविशेषणमिति नन्वेवं हंसाविच्छत्रेकादशे जाते हंसः इति सान्तसंयोगस्य सर्वनामस्थान
ऽपरकत्वाद्दीर्घः स्यात् अन्तवत्त्वेन कारान्तत्ववस्तुन। नाहृप्त्वाननतिदेशात् सर्वनामस्थानपरकं सान्तसंयोगान्तं यदङ्गमित्यर्थे न सान्तत्वाभा रामः
वान्न भवतीति यद्वा ऽस्यसदेशस्येति न दोष इति ननु परिभाषेन्दुशेखरे इयं चोभयोर्युगपत्प्राप्तावेवेत्युक्तम् अत्र तु नोभयोर्युगपत्प्राप्तिरि ११५
ति चेन्न यस्य कस्यचिदुद्देश्ये युगपत्प्राप्तिरस्ति तस्य एकत्रासत्त्वेपि भवतीत्यर्थात् शिरांसीत्यत्रोभयोः प्राप्तिरस्ति हंसशिरांसीत्यत्रान्त्यस्ये

वेतिन्स्येषः॥ ह्रस्वोनपुंसके। अजन्तस्येति। ननुवारिणीत्यत्रह्रस्वः स्यात्तद्वारणायप्रातिपदिकग्रहणमितिवाच्यम् ह्रस्वेशो कर्त्तव्ये दीर्घकरण
वैयर्थ्येनह्रस्वाभावज्ञापनात् ननुह्रस्वान्तेशि सर्वनामस्थानमित्यनेनसर्वनामस्थानसंज्ञायां ज्ञानेद्वित्यत्रनपुंसकस्येतिनुम् स्यादितिचेन्न
सुडनपुंसकस्येतिसूत्रेऽनपुंसकग्रहणेनकर्त्तव्यं शिसर्वनामस्थानमितिनियमार्थं नपुंसकात्परं शि एतदेवसर्वनामस्थानसंज्ञंभवति नान्यदि-
तिनियमेनसिद्धावनपुंसकग्रहणसामर्थ्येनजस्शस्संबंधिशेरेवग्रहणमितिज्ञानेनादोषात् सत्वप्रधानेति अन्तवद्भावात्प्राप्तसत्वप्रधा
नेत्यर्थः तेनकाण्डेवित्यत्रपूर्वान्तवत्वेनसत्वप्रधानत्वान्नदोषः तेरुवस्याएवेतिशंकानावकाश इति ननुकाण्डेइत्यत्रपर्जन्यवल्लक्षणप्रवृ
त्यापूर्वंह्रस्वेततएकादेशेलक्ष्यलक्षणस्येतिन्यायेननपुनर्ह्रस्वप्राप्तिरेवेतिचेन्न भाष्यप्रामाण्ये ननपुंसकघटकवर्णैकादेशभिन्नेलक्ष्येल-
क्षणस्यसकृदेवप्रवृत्तेरित्यर्थात् अतएवज्ञानेभ्यइत्यत्रनदोषः अन्यथानपुंसकाजन्तप्रातिपदिकत्वाद्ध्रस्वः स्यात् वहिरङ्गपरिभाष
यावारणम्वा एवंचादसोसेर्दादुदोमइत्यत्रत्यशेखरेऽपिचिन्त्यएवेतिवोध्यम् स्थानिकसूत्रस्थभाष्यविरोधेऽपिन तत्रलक्षणान्तरेणपु
नः प्राप्तेः प्राधान्यमिति तत्वंचात्रप्रकारतानाश्रयत्वं समानानुपूर्वीकइति अन्यथाऽजरशब्देपुंस्त्वप्रवृत्तिनिमित्तत्वमादायपुंवद्भावउक्तइ
त्यमुशब्देपुंवत्वापत्तिः नन्वेवमप्यर्थभेदेपिशब्दैक्यमितिदर्शनेसर्वोयंप्रयासः सफलः तत्रचदर्शनेफलवाचकपीलुशब्दे[illegible]नितिपुंवत्वंदुर्वी
रमतआह समानार्थश्चेति तत्प्रकारवोधेच्छयोच्चरितइत्यर्थः एवंचयत्रतत्प्रकारकवोधेच्छयोच्चार्य्यतेतदासपुंवदितिसूत्रार्थइतिभावः॥ ४

स॰ भ॰ कृत्यजन्तान पुंसकलिंगाः॥ ॥दादेर्धातोर्घः फलान्तराभावेति अत्र केचित् दादेरित्यत्र कर्मधारयः धातोरित्यवयवषष्ठी धातोरवयवो य आदि
११६ र्दकारः सा पंचमी तस्मात्परस्य घः स्यादिति वाक्यार्थः धुगित्यत्र दात्परत्वं व्यवहितहकारसम्भवेन येन नाव्यवधानन्यायेनैकव्यवायेऽस्त्यत्वम् दाम
लिडित्यत्र वर्हूनां व्यवायसत्त्वान्न भवति एवमधोगित्यत्रापि न दोष इति बोध्यम् त्वन्मतेऽधोगित्यत्र घत्वाय दादेरित्यस्यावश्यकत्वात् तत्फला
न्तरं स्फुटम् एवं च दादेरित्यादिनिर्लक्षणा च न कर्तव्या भवति त्वन्मते धातोरिति व्यर्थं च कथमधोगिति शंका च स्वरसात्सगच्छते भाष्ये तूपलक्ष
णमेवेत्याहुः॥ एकाचो वक्तुं युक्तमिति भष्प्रत्याहारोपि झषस्तथोरित्यत्रैव कृतः अतो भष्कर्तव्यः उज्झितेत्यादि झलन्तधातवः सेटका एवेति
भष्प्रत्याहार एवास्तु किं झष्प्रत्याहारेणेति चिन्त्यमेतत् अशक्तीति, शक्त्यभावेति वक्तुं युक्तं फलाभाव इति स्वलाद्योः स्ध्वोरिति अन्वयेन वि
शेषणत्वेनान्वयसंभवेपि तयोर्झलाद्योरेव संभवेनानुवृत्तौ फलाभाव इति भावः एतेन झलां जशोऽन्त इत्यत्रान्तपदे नैव तन्निर्वाहे स्ध्वोर्ग्रहणं
व्यर्थमेवेत्यपास्तम्॥ ॥ननु धुग्लो झलीत्यत्र झलूपदं झलादि प्रत्ययपरमित्युक्तम् तत्कथमुच्यते स्वलाद्योः स्ध्वोरिति रध्व इत्यनयोः प्रत्य
यत्वाभावादिति वाच्यम् झल्पदस्य प्रत्ययावयवझल्परत्वस्य वक्तुं शक्यत्वेनाप्यन्वयसंभवात् तद्धाडिति आदिनाद्धिट् नेत्युक्तमिति नन्वेवम् राम:
लोन्त्यपरिभाषयाऽन्त्यस्य स्यात् तत्र जातेपि तस्मिन् चर्त्वेन न दोषः नन्वस्य भष्भावे धकारादिरेव स्यादिति चेन्न सयविधानं व्यर्थम् तत्सा ११६
मर्थ्याच्चर्त्वं नेति चेन्न एवमपि दामलिडित्यत्र ढत्वे भष्भावे जाते एकाज्ग्रहणसामर्थ्येनालोन्त्यपरिभाषा बाधेत कारस्य स्यादिति बोध्य

मिति नकारान्तस्याभावेऽचोपि स्यादिति चेन्न वस्तुतो हलां जश्झशीत्यतो हलामित्यनुवर्त्य व्याख्येयमिति पूर्वककारस्यापि स्यादिति बोध्यम् स्व
ष्टेवेति अप्रशानिति निर्देशस्तु परत्वान्तेपि पदान्तप्रयोजकप्रत्ययइत्यर्थः इग्यणः हलइति दीर्घोपजैरिति यदिह हल् इत्यस्याङ्गपदस्य संप्र
सारणपदे प्रत्यासत्त्या संप्रसारणनिमित्तप्रत्ययनिमित्ताङ्गस्येत्यर्थे न दोषइत्युच्यते तदात्र न दोषइति बोध्यम् अदोषइति ननु यणुरित्यत्र वे
ञोवयादेशेऽच्छित्त्वसंप्रसारणयोः वयादेशयकारस्य संप्रसारणे प्राप्ते पश्चात्परस्य वकारे कृते तेन तस्य संप्रसारणं तु न [illegible] त्येव वादेशवि
धानसामर्थ्यात्संप्रसारणं न भवति। तत्र ओकारे संप्रसारणसंज्ञायां पररूपार्थमेव वादेशविधानं स्यात् ममतु पूर्वसूत्रात्संप्रसारणपदानुवृ
त्त्या पररूपस्याप्यकारविधानसामर्थ्याभावादिति सुधियः॥ ॥किमः कः॥ इमइत्येव कर्त्तव्यम् त्यदादेरित्यनुवर्त्तते तेनेमन्तत्यदादेश्चादे
शइत्यर्थो लुगिति होः क्वांतीत्यत्राप्येवमेवेति ककारोच्चारणसामर्थ्यात्त्यदाद्यत्वविषयेइत्युक्तावपि दोषः स्यादेवात आह तन्मध्येति नचेमोनिर्दि
श्यमानत्वात्तस्यैव स्यादिति वाच्यम् इवर्णान्तो वर्णान्तधातोर्यथा निर्दिश्यमानत्वं तथात्रापीमन्तत्यदादेरेव निर्दिश्यमानत्वात् अप्रनाप्यकः वि
भक्ताविति अत्र विभक्ताविति चिन्त्यप्रयोजनं हलिलोपः मोत्तु तक्रकौण्डिन्यन्यायेनायं लोपबाधकः स्यादेवेति बोध्यम् अनुवृत्तमिति न
नु लोपकरणे स्वरितो न भवति॥ अश्शकरणे तु अशः संपूर्णस्थानिकत्वात्स्वरितः प्रसज्येतेति चेन्न अशो निपातानुदात्तकरणेनादोषात्
आहुरिति अत्रारुचिस्तु उपसर्जनत्वात्पूर्वमेवाकचोऽप्रवृत्तौ प्रतिबंधकत्वाभाव इति तदनन्तरं गौणत्वेपि प्रवृत्तेरेवेति बोध्यम् आद्य

स· भ·
१९७

त्तवदे· एतत्तुल्यमेव व्यपदेशिवदेकस्मिन्निति वोध्यम् वाधकावाधितेति नवु कृताकृतप्रसङ्गमात्रेणैव नित्यत्वमस्तु मास्तु चेदम् अस्मायित्य

त्रस्मै पुनः प्रसंगविज्ञानात्स्यादिति चेन्न इदमएइति स्थितेत्यदाद्यत्वापेक्षया नित्यत्वाद नादेशापत्तेः वस्तुतस्त्वन्तरङ्गत्वादुपजनिष्यमा

णेतिन्यायाभावादेशः नास्त्येवेदं फलमिति वोद्धव्यम्॥ अन्यार्थतापत्तेरिति सामर्थ्यादकारस्यैव स्यादिति तदर्थमेव कुतो न न तत्स्यादिति भावः॥

पर्य्युदासेति· प्रसज्यप्रतिषेधे तु शास्त्रीयत्वात्प्रसज्यलक्षणे ननिषेधः स्यादिति भावः॥ जश्शसोः। ध्वनेरिति· ध्वन्यनुवादकाविशब्दस्य वा-

धितमत्त आह लिपीति नलोपः सुप् सर्व्वविभक्त्यन्त इति सम्बन्धसामान्यषष्ठ्या समासोत्र कर्त्तुमुचितः कर्म्मसाधनं इति एवं च विधि

शब्दस्यावृत्तिरिति यदि तु सुप्शब्दस्य सुप्सदृशे लक्षणा तदा तु न विधिशब्दस्यावृत्तिरिति वोध्यम्॥ भक्ष्यनियमे इति अत्र शास्त्रेति

यमस्य सामान्यशास्त्रवाधकत्वमिति वचनस्य वचनेन वाध इति नियमत्वं युक्तम् पंचपंचनखेत्यस्य तु नैवं तत्र सर्व्वमांसभक्षणास्यरा

गतः प्राप्तत्वेन वाध्यवचनाभावात् भाष्यन्तु इतरमांसभक्षणनिषेधे तात्पर्य्यकम्॥ किं च येषां वाच्ये प्रातिपदिकसंज्ञा तेषां असाधुत्वं स्यात्

एवं च पंचनखभक्षणाभावे मत्स्यवाचः स्यात् न भवति तु नेति केल क्षण्यसत्त्वाच्चिन्त्यमेतत् तद्व्याप्येति सच भिस्त्वादिः यदि तु पूर्व्वत्रास्ति त्तमः १९७

इमित्यत्रो लोपः सुप्स्वरतिसत्त्वे पूर्व्वत्रेत्यनुवर्त्यपूर्व्वत्वेषु विधिविधिषूच्यते तेनेदं द्व्यर्थं षत्वस्य सपादिस्थत्वाभावात् वैरूप्यापत्तेश्चेति सात्रस्वरविधौ विधित्व

सितरेषु नियमत्वमित्येवं रूपा विधिशब्द एकत्र कर्म्मसाधनत्वमिति वैरूप्यस्य तन्मतेपि सत्त्वाच्चिन्त्यमेतत् तस्मात्पूर्व्वत्रेत्यत्राप्यनुवृत्तिरेव ज्यायसीति

बोध्यम् नैदोष इति ननु संज्ञाग्रहणमास्तु अयमर्थश्च न कर्तव्यो नियमश्च स्यादेवेति चेन्न ग्रामणिपुत्रावित्यत्र द्वन्द्वे ग्रामणिशब्दस्य पूर्वनिपातो न रह्रस्वस्या
स्यापूर्वं घित्वाभावात्पूर्वनिपातो न स्यात् ब्रह्मवाचककशब्देन दिवशब्दस्य समासे द्युकावित्यत्रेपूर्वनिपाते सति संधित्वं प्राप्नोतीति नोत्तरप्रयोग इति तदर्थ
मेवैत्तादृशसूत्रार्थाश्रयणस्यावश्यकत्वात् तत्रोत्तरपदे प्रत्ययलक्षणं न उत्तरपदत्वे चेति निषेधात् तन्निपातोत्तरं तु न तन्निषेधप्राप्तिः उत्तरपदस्य
कार्यित्व एव तन्निषेधप्राप्तेरिति वदन्ति. नन्वेवमपि हरिहरावित्यत्र पूर्वमेव घित्वप्रवृत्त्या दोषः न च तदुत्तरमपि तत्प्रवृत्त्या न दोष इति वाच्यम् यद्दे
शे एव घटो वर्तते तद्देश एव घटो भवतीति प्रतीत्यापत्तेरिति चेन्न द्वन्द्वे घीत्यस्यावृत्त्यार्थद्वयाङ्गीकारात्॥ हलि च रेफान्तधातोरुदाहरणानि सुरधा
तोः क्विपि सूः करोतीत्यादीनि धातोः किम् अग्निः करोतीति नन्विदुदुपधस्येति व्यर्थः स्यादिति तदवग्रवाङ्गत्वेनातत्प्रवृत्तिरिति चेत्त्वं हार्य्यणीत्यादौ हलि
चेति दीर्घापत्तेः न संयोगान्तः अत्र न हलो यमादित्येव सूत्रयितुमुचितं हलः परो यो यमो ततः परस्यानोकारस्येत्यादि सूत्रार्थः नन्वेवं पटमनइत्यत्र प
टशब्दात् क्विचि ततो मनिन् प्रत्यये णिचि टिलोपे तस्य पंचमीसमासेन स्थानिवत्त्वेन हलुपरत्वाभावाल्लोपः स्यात् संयोगग्रहणेन संयोगसंज्ञायाद्विष्ठत्वात्पर
स्यैव न स विधिरिति न स्थानिवद्भाव इति चेन्न तस्यानित्यत्वात् इनूहन्पूषार्यम्णां स्येति दीर्घ इति एतेन नोपधाया इति सूत्रस्थोपधाग्रहणस्येदमे
व फलमिति सूचितं यद्दित्वनन्तरस्येति न्यायो बाध्यसामान्यचिन्तेति चाश्रीयते तदा त्वसन्तस्येति सूत्रे उपधाग्रहणानुवृत्तये गोमानित्यत्र नुम्दीर्घयोः
प्राप्तावुभयोरेकविषयत्वेन दीर्घस्य नुमपवादत्वं स्यात् इति गोमानित्यत्र नुम् नैव स्यात् उपधाग्रहणे तु उपधादीर्घः नुम् तु उगिदिन्नोदेशत्वान्नेति

वृत्रहयतीति नन्वत्र अकारः स्यात् उपधायात्वाद्धः स्यादाजत्वेन। अत्र उपधायाइत्यत्रोपधाशब्देनपूर्व्वपदाघटकस्यैवग्रहणात् अतएववृत्रहयतीत्य
त्रहणो नराकारस्यवृद्धिर्न्ने स्थानिवत्वन्न नपदान्तेतिनिषेधात् अतएवजगच्छब्दात् अपि चिजागयतीत्यत्रवृद्धिः अन्यथानुत्यत्वादृद्धिर्नेस्यात्॥
स्यायंनियमइत्यादि ननुहल्ङ्यादिसूत्रेणत्वसिद्धिरेवतत्फलमिति विधित्वसम्भवमितिकथम् नियमत्वमितिवाच्यं रषाभ्यामित्यनुवृत्यारेफष
काराभ्यांपरस्येतिसूत्रार्थाश्रयणेननियमंसाधयितुमुचितत्वात् वस्तुतोऽत्पूर्वस्येतिपरिभाषाहन्तेर्णत्वमात्रमस्यालिङ्गम् एवंचयेनवाक्येनह
न्तेर्णत्वन्तत्रपूर्वस्येत्युपतिष्ठते इत्यनियमेनियमकारिणीत्वाभिप्रायेणनियमइत्युक्तम् हस्थानिकेति अत्पूर्वस्येत्यस्यभाष्यमत्याख्यानेतुह-
स्थानिककवर्गाभाववद्धन्तेरुपलक्षणत्वात् हादेशेषुप्रतिषेधोवक्तव्य इत्यस्याप्यत्रैवतात्पर्य्यम् प्रघनाघनइतिनत्वभ्यासस्यैनैरर्थकादर्थव-
द्धन्तित्वाभावान्नणत्वं परस्यत्वभ्यासव्यवायान्नेतिचेन्नहन्तेरित्यस्यार्थवद्धन्तिसंवन्धइत्यर्थेनणत्वापत्तेरित्याशयात् अतएवप्रणिहिनादेशेमण-
त्वं उभौसाभ्यामस्येतिचात्रलिङ्गं नकर्तव्यमिति ननुप्रत्याख्यानपक्षे प्राचांतुनदोषः तत्पक्षेतन्मतेवचनेनैवनिर्वाहात् हादेशेइतिचेदंवार्तिक
कृतांसूत्रस्यप्रतीकंगृहीतंकुव्यवायेइत्यादिणत्वविधायकशास्त्रेषुणत्वस्यप्रतिषेधइत्यर्थः तेनटीकोक्तानुक्तिशङ्काप्रत्युक्ता मघवावहुलंलो
केऽसाधुत्वमिति इदंचिन्त्यम् मघवन्शब्दस्यत्रन्तादेशस्यासाधुत्ववोधनेनोपपत्तौविशिष्टस्यासाधुत्ववोधनेमानाभावात् अतएवेन्द्रोमरुत्वान्म
घवाइत्यादयोलोकेप्रयोगादहवोदृश्यन्ते अतएववार्तिकेतदित्येकवचनप्रयोगः संगच्छते अन्यथाएतावितिवक्तुमुचितंस्यात् आभ्यां

तरङ्गइति नचामीवान्तरङ्गस्यासिद्धत्वेपिपररूपस्याभावेनान्तरङ्गपरिभाषाप्रवृत्तिःस्यादिति एवंचसंप्रसारणस्यासिद्धत्वेपिपररूपस्यासिद्धे
त्वाभावाद्यस्येतिलोपइतिवाच्यं संप्रसारणाश्रयपूर्वरूपेणतन्निष्ठधर्मस्यातिदेशात् अतएवान्तरङ्गपरिभाषाज्ञापनपरंभाष्यंसंगच्छते
॥ अन्यथावहिरङ्गसंप्रसारणस्यासिद्धत्वेपिपररूपस्यासिद्धत्वाभावाल्लघूपधगुणेविश्वौहइतिसिद्धेचारितार्थ्याभावेनासङ्गतत्वंस्पष्टमेव
वस्तुतःअसिद्धवदत्राभादित्यत्रजातासिद्धत्वमेव अतएवभाधिकारेपरत्वादिनांबाध्यबाधकभावोभवति अतएवचनवीनाःअन्येयानेनेदंबाध्य
मुक्ताःनेनेतिविनिगमनाविरहःस्यादिति प्रकृतेतत्रभावादन्तरङ्गपरिभाषाप्रवृत्तिःस्यादितिचिन्त्यमेतत् नानर्थकइति ननुस्थानिवद्भावेनान्त्वाभा
वेप्यन्नन्तत्वंस्यादेवसुवन्तत्वमितिचेन्न अल्लोपोऽनइत्यत्रानोनिर्दिश्यमानस्यैवसत्वेनास्यैवात्रानुवृत्त्यात्राप्यनोनिर्दिश्यमानस्यैवग्रहणात् ॥ अ
र्थाधिकारानुरोधात् यद्वावैयधिकरण्येनएषामनइत्यर्थोत्रसचनिर्दिश्यमानएवतस्यावृत्त्यातदन्तविधिरन्नन्तस्येत्यादिरितिनदोषः ॥ किन्नुमत्व
यस्यकुःघइतीति यदिघस्यान्तरतम्याद्गकारः फलमपेक्ष्यतइतितस्येत्यपिन्यासेगइत्येवोचितम् अस्यासिद्धत्वेनजश्त्वप्रवृत्तेः प्रक्रियाला-
घवाच्च तथापिकैयटानुरोधेनघउक्तस्तदाशयस्तुविवरणेद्रष्टव्यः नचयथाकथंचिद्धकारस्यवकारान्तातनमत्वोपपादनेपिनश्चेत्यत्रश
कारषत्वजश्त्वाभ्यांडकारेडकारान्तरतनमत्वंदुर्वचमेवेतिकथमुच्यतेनश्चेत्यत्रघानुवृत्त्यावक्ष्यदोषादितिवाच्यम् गृहंगंतुंप्रवृत्तस्यकपाटं
पर्य्यायाटयाग्रेइतिन्यायेनतेनतस्यतद्धदेवसुवचत्वात् यद्वाझषस्तथोरित्यतः प्राक्किनोपान्तेनशर्वोचस्तांजशःइतिन्यासेनजश्त्वसुल

शे॰ भ॰ ११९ भे फलभेदाभावः नचैवमपि प्रक्रियालाघवाय गे विधेये घविधानस्य कोऽभिप्राय इति चेच्छृणु दादेरित्यनन्तरं तदनुवृत्तिसंभवेन विधेयानुपादा
नेलाघवमिति॰॥ तथाचैवं न्यसनीयं॥ चोः कुरित्यस्यानन्तरं नह्यो धः आहस्थः व्रश्चभ्रस्जहोढः दादेर्धातोः वा द्रुहः क्विन्नन्ते नशो वा एकाचो व
शो दधस्तथोः झलां जश् इति॥ ननु ससुट्कमेव एवं तु न युष्मदस्मदोरनादेशे इत्यनादेशपदं योचीत्यत्रैव क्रियतां इति तु नोक्तरूपस्य सौलभ्यादि
ति चेन्न युष्मयते युष्माकमित्यत्राकारश्रवणार्थं तदावश्यकत्वात् अभिधानस्योक्तत्वात् नच पञ्चमीसमासेन स्थानिवत्त्वेनाश्रेष्ठव्य एव
अभ्यम् भ्यमोः फलभेदापत्तिरिति वाच्यम् पञ्चमीसमासस्यानित्यत्वेन तत्राश्रयणेन फलभेदाभावेप्यत्राश्रयणे मानाभावात् एवं दोषः सुष्ठु
एवेति बोध्यम्॰ किञ्च युष्मदस्मदोरित्यस्यापि च चारितार्थ्येऽनादेशे चि॰ हलि चोभयत्रापि यत्वापत्तिरिति॰ तत्राचीति न कर्तव्यं स्यात् अत्रा
प्यनादेशसत्वे तु परिशेषलब्धमेव तद्भवतीति न कार्यमितीदानीं गौरवापत्तिः एवञ्चेदं सम्यगेवेति बोध्यम् किंच योचीत्यत्राप्यनादेश इति मा
स्तु द्वितीयायाञ्चेत्यात्वविधानाज्ज्ञापकादादेशेऽपि तदभावादिति इदं तु पुनश्चिन्त्यम् आकमित्येव टिलोपेन सुटोऽप्राप्तेः ससुट्कनिर्देशो व्य
र्थः व्याख्यातमिति शेषग्रहणस्य पूर्वं कर्तव्यतायाउक्तत्वाच्छेषग्रहणमनुवृत्त्येति भाष्योक्तरीत्या त्वादिविषये त्वमादेशावारणस्यौचित्येन विप्रति राम॰
षेधकल्पनं भाष्यानुक्तामूलकत्वेत्युक्तम् एवं शेषग्रहणस्य स्वमते स्पष्टार्थोक्त्या तदनुमानस्याशक्यत्वात् पूर्वविप्रतिषेधाश्रयणभेदेनापि न त ११९
दप्यसङ्गतं एतदर्थं शेषग्रहणस्यावश्यकत्वाच्चेति चिन्त्यमेतत्॥ विग्रहे इति॥ नच विग्रहरूपाणामभाव इतीदमयुक्तमिति विग्रहो यस्येति.

बहुव्रीहिणासमस्योपेक्षणीयत्वात्। पदस्य अन्तइति नन्वन्तग्रहणं मुख्यार्थलाभार्थं तेनान्तइत्यत्र न दोषः तत्रान्तत्वस्यासिद्धेः षष्ठ्यादितिचे
न्न॥ उक्तार्थज्ञापने मानाभावात् नपूर्वमित्यादावनुदात्तमित्यस्यानधिकारात् अनुत्तमयमेति। यस्तु तः परस्येत्यस्यानुपदमेव त्यधिकरणाद्यो
क्तेः विपरिणामकथनमयुक्तम् नचतज्वक्त्रोष्टुरितिवन्नाभिनभश्चेतिवचस्थान्यादेशभावकल्पनस्योचित्यान्तिङन्तस्यानुदात्ताक्त अन्तादे
शोभवतीत्यर्थादुदात्तसाम्येनाद्युदात्त एकानुदात्तत्वोभयविशिष्टादेशापत्तिः पचतीत्याद्यनुदात्तत्वे कोदात्तविशिष्टो वास्यादन्तः सर्वग्रह
णे सर्वानुदात्त इति कर्तव्यमेवेतिचेन्न तिङितिभाष्योक्तज्ञापकात्तत्रान्तग्रहणाच्चात्र तिङन्तावयवस्य लक्षणीयमिति त्येवयवच्छानुदा
त्तत्वकइत्यर्थे विनिगमनाविरहेण सर्वथावयवस्य सिद्धेर्वैयर्थ्यमित्याशयात् नचतिङन्तावयवस्येतिस्थान षष्ठीत्वादादेः परस्येत्यापत्तिः ए
कैकावयवस्थानेनानुदात्तत्वविधानादादित्वस्य वक्तुमशक्यत्वात् आदित्वस्य समुदायविधाने एव संत्वात् यदि तु मन्तत्रान्तग्रहणाद्धत्राप
वा तिङ्समुदायस्यैव षष्ठीकल्पयित्वा विधानमित्युच्यते तदादादेरिति प्रवर्तत एवेति। सर्वमितिकर्तव्यमेवेतिचिन्त्यमेतत् मेरुमिति न
त्वनद्ग्रामे कंवलोमे रुमिति छान्दसत्वस्यैवोदाहरणं न वाक्यस्येति अस्तु पर्युदास इति वाच्यम् शालीनान्ते इत्यत्र छान्दसत्वस्य वक्तुमश
क्यत्वात्॥ अस्मे विति। ननु त्वमित्यस्यापि संबोधने वर्तमानत्वे प्रथमैवस्यादिति त्वामित्याद्यसंगतमितिचेन्न अत्र संबोध्यत्वेनज्ञानकर्मपदार्थयु
ष्मदर्थः अतएव चेतनेऽस्य प्रयोगः अहमनेन संबोधितइत्यचेतनस्य ज्ञानबाधाभावात् एवंच संबोध्यत्वप्रकारकज्ञानवर्द्धकत्वेपि नसं-

स॰ भ॰ बोधनार्थकत्वमित्यदोषात् नचैवमपि भवच्छब्दस्य संबोधनार्थकत्वाभावात् भवंतमित्याद्यसंगतम् प्रथमायाएवापत्तेरिति वाच्यम् चेतना
१२० चेतनसाधारणतया संबोध्यत्वमात्रार्थकत्वेपि प्रवर्तनाविषयसंबोध्यत्वाभावात् अत्र प्रवर्तनाविषयसंबोधनस्यैव ग्रहणात् हे भवन्नि
त्युक्ते हि तस्य प्रवर्तनाविषयकं ज्ञानं भवति मया यत् किंचित् कारयन्तीति मकानि त्युक्ते तु मम हृयक्रियान्वयिसंबोधने प्रथमा ताम भवंत
मित्यत्र तु क्रियान्वयित्वाभावेनादोषः परं तु गदाधरेण क्रियान्वयित्वं भस्योक्तम् वस्तुत एतादृशक्लिष्टकल्पनापेक्षया स्वेति परस्य ष
रत्वतः सार्थक्यापत्त्या पूर्वोक्तमेव युक्तमिति प्रतिभाति· आमंत्रितं· कारकमिति नच तदभावे स्यादर्शनापत्तिः नच लोप एव कार्येऽवि
द्यमानत्वग्रहणेनाविद्यमानवदित्यर्थः लोपपक्षस्य आपत्त्याः लोपस्य तस्यापत्तेः सर्वादेशार्थमावश्यकमेवेदमिति वाच्यं सर्वथा लोपेन तदर्थबोधे नैव
स्यादिति तद्बोधार्थं परं प्रयोगस्तु स्यादिति नेदं पूर्वप्रयोगाभावमात्रफलकं स्यात्तथा च राजदंतादिषु परमित्युक्तं मामंत्रितमित्यस्य परप्रयोगात् सिद्धे रि
रंष्यर्थमेव स्यादितिवत् कारणार्थः प्रतिपद्यतेऽत इति अयं वतिर्व्यर्थ एव नच शिष्यमाणानुप्यमानेनेत्यायेनं सिद्धे परप्रयोगमाणम्नावश्यकः सजातीयविष
येतत्प्रवृत्तेः ननु स्थासदृत्यत्र पूर्वलोपे विजातीयेनाप्यर्थबोध इति प्रकृतेपि तदर्थं स्यादिति सर्वलोपार्थमावश्यकमिति चेन्न लोपपरूहस्यैव सिद्धेस राम:
मर्थ्यादित्यर्थसिद्धेः नचैवं त्रिपाद्यां प्रवृत्तये वति घटितत्वमिति वाच्यम् तथा सति सन् इत्यस्याविद्यमानत्वेन तत्र ङमुण्न स्यादिति अनिष्टमेवापद्ये १२०
नेति तदप्रवृत्तेरिष्टापत्तेः नचैवं वत् करणाभूलोकत्वात् त्रिपाद्यां प्रवृत्तिः स्यादिति पूर्वे ङमुडनापत्तिः नहि पूर्वेणापरस्य प्रत्यासत्त्या प्रहलोप एव प्रवृत्तिः क

ल्यते नाम आमंत्रितात्परस्येति अत्र तत्रेदमित्यर्थः एवमनुगतरूपेणाकल्पनया आम् मोऽइत्यत्रापि आमंत्रितात्परत्वेनाश्रयणाभावेनान्नप्रकृत्य
सर्वनानुगतरूपेणादोषात् नचैवं प्रत्यासत्त्यैव निर्वाहे दैवतिव्यर्थः प्रत्यासत्तित्वाभावार्थमिवावश्यकत्वात् इदमेव केचित्स्वाश्रयमिति दिक्॥ स्मरामीति ने
चपश्यार्थैरितिनिषेधः इन्द्रियजन्यत्वे एव निषेधात् स्मरणस्येंद्रियजन्यत्वाभावात् संस्कारजन्यत्वात् यद्वा साक्षात्कारार्थकेति निषेधः स्मरणं
तु न साक्षात्कारः मानसं ध्यानं तु साक्षात्कारवत् एवं मनसा साक्षात्करोमीति संगच्छते॥ इन्द्रियजन्यत्वं साक्षात्कारत्वं न त्वा साक्षीत्वमत्र हेतुर्निर्मि
गीकार एवेति बोध्यम् निवृत्तिरिति ननु अयेद्व्यस्यबद्धोवत्वाभावात् अपादाने विभक्तित्वेपि न दोष इति चेच्चिन्त्यमेतत् अग्ने इन्द्र वरुणे
ति बह्वचउदाहरणार्थमावश्यकमेवैतदित्यन्यदित्यादि बोध्यम्॥ करोतीति सिवर्णे आश्रयः तेनैकाधिकरणरूपसामानाधिकरण्यमस्त्येव
ननु हन्तीति ननु घटो घटमित्यर्थप्रवृत्तिनिमित्तादेर्गर्भस्याविवक्षणेपि घटः कलशमित्यादौ घटत्वकलशत्वरूपप्रवृत्तिनिमित्तभेदमादाय शाब्द
बोधवदत्रापि अग्न्यादिपदानामर्थपरत्वस्य पूर्वमुक्तत्वादर्थैक्येपि पूर्ववद्धर्मभेदोप्यस्त्येवेति किमर्थं न तु ग्रंथ इति चेच्चिन्त्यमेतत् परे तु अग्न्या
दिशब्दः शब्दपर एव अर्थपरत्वे तु त्वेतानिते इयिरितिपुनरग्न्यादिपदवैयर्थ्यापत्तिः अग्न्येएतानि नवनामानि इत्येव स्वारसिकोर्थः नचैका
र्थबोधरूपसामानाधिकरण्याभावः नवनामानीत्युक्ते त्वदर्थे शानिरिवाटि तन्मर्थो बोध्यते इति तत्सत्वात् नच पुनरर्थपरत्वं उच्चारणकाले शब्द
परत्वमेव नवनामानीति वाक्यबोधोत्तरं तेषामेकार्थ्येनेति सामानाधिकरण्यं त्वनुवर्तते अर्थपरत्वं तु नेति पूर्वग्रंथः चिंत्याशयो नात्वित ग्रंथ इत्याहुः

स॰ भे॰
१२१

॥ ननु सामानाधिकरण्याभेदान्वय्यर्थप्रतिपादकत्वमेवास्त्विति चेन्न दोषः नच देव करोषीत्यत्राप्येवं वारणे आमंत्रितेद् इत्यस्य वैयर्थ्यं अपरमनुकूलमेवे
ति यद्यपि तत्राप्यभेदान्वयेऽस्ति क्रियायां तद्भूतोऽस्त्यादान्याभ्यामीकारात् नच त्वमीत्यनेनाभेदान्वयेपि न देवेत्यनेनाभेदान्वयः देवत्वमिति वाक्ये एकदेश
न्यायेन देवेत्येतन्मात्रप्रयोगे तु त्वंपदार्थस्य तस्मिन्नेवान्तर्भावेनाभेदान्वयस्य सूपपादत्वात् करोषीत्यस्य सुंदरं करोषीत्यस्य सुंदरं करोषी
त्यर्थे प्रयोगे सुंदरपदार्थभेदस्य सत्वाच्चेति चेन्न अप्यादिशब्दानां शब्दैः परत्वेन वारणेपि अर्थपरत्वेन तदसत्वात् मन्वर्थपरत्वे विशेष्य
विशेषणाद्युच्चसामान्यवचनमप्यस्तीति कथं तेन वारणं सामान्यवचनमित्यस्याव्यापकधर्मावच्छिन्नमर्थः घटो नीलइत्यत्र नीलापेक्षयाघ
टस्याव्यापकधर्मावच्छिन्नमेव प्रकृतेऽप्यादिपदार्थानां समाननियतत्वेनाव्यापकधर्मावच्छिन्नत्वमिति न दोषः अथ किमर्थं समानाधिकर
णाद् इति पदमिति चेन्न पाचक पाठकश्च सुवां पचतमित्यादौ अव्यापकधर्मावच्छिन्नत्वरूपसामान्यवचनत्वसत्वादापत्तिसत्वादावश्यकत्वात् न
नु प्रथमांतपदातिरिक्तस्य समुच्चय एव नास्तीति संबोधनांतरस्यापि समुच्चयाभावदिति चार्थे द्वंद्व इति सूत्रेप्यवरे उक्तत्वादिदं मन्युदाहरणमसं
गतमिति चेन्न उच्च उच्चैरिति मनोरमादिषु प्रामाण्यप्रयोगेषु तद्भिन्नस्य समुच्चयस्वीकारे बाधकाभावात् तत्र समानाधिकरणपदमपि मानमस्तु रामः
चुतिदिक्कु निपाततैरिति ननु युजादिषु निरुपपदेपि निपातनसत्वात् कथं साहचर्येण सुबुपपदत्वलाभ इति चेन्न सर्वत्र लाक्षणिकस्य निपातन १२१
स्य सत्वेन तत्साहचर्याद् अस्याप्यलाक्षणिकत्वसुबुपपदकत्वरूपनिपात्यनेद् इत्याशयात् अनिङ् इत्संज्ञकेति ननु अवुदन्दान्तापत्तिः नच तत्रै

लोपोऽनिष्ट एवेति वाच्यं इरइत्संज्ञा वाच्येति वार्त्तिकसत्त्वेन तत्र लोपस्य जायमानतया तद्व्याख्यानेदुत्संज्ञके ककारान्तत्ववदन्त्याप्रत्याफलमेदेव
व्याख्यानानापत्तेः यद्यपीदित्यदस्य शब्दस्वरूपाध्याहारे न तदन्तविधिनादुत्संज्ञके ककारान्तभिन्नत्वेन न दोषः न च रेफवान्त एवेकारः ॥ तदन्तविधिर्घ
टितवाक्यार्थसामर्थ्यादन्त्येरिन्त्येग्रहणात् तथापि एकदेशे शब्दाध्याहारस्य क्लृप्तत्वे दोष एव न चेदिन्तोनेति प्रसज्येत न संभवः ॥ प्रसज्यसा
त्रदृश्यमानत्वादिति चेत् पर्युदासाश्रित एव किंतु प्रसज्येन शब्दस्वरूपाध्याहाराणां तदन्तत्वे दोष इति तत्त्वं न प्रवृत्तिरिति अनन्त्यविकार इ
ति प्रत्ययाप्रत्ययविशेषणादेतिभावः व्याख्यानादिति चोइति लिंगात् अच्प्रत्याहारग्रहणेहि तस्यासंभव एव स्यात् न च वर्गग्रहणं तत्रेति वा-
च्यं इचेति वैयर्थ्यापत्तेः अन्यथा सवेस्य परे दीर्घस्यैव सत्त्वे दीर्घादित्येव सिद्धेः संगतिः स्पष्टैव न चोत्तरपदे इत्यधिकाराच्च वर्गेषूत्तरपदे एव दीर्घ
सत्वादुत्तरपदाभावे च्वेचेति चरितार्थं तर्हि चावित्यत्र स्वरितेनाधिककार्योद्गग्रहणं चु इति पठितस्य च ग्रहणं चेन्नितत्वम् ॥ अनभिधानमिति
तृतीय इत्यत्रैव प्रयोजनस्य भाष्ये कथनात् विषग् अत्र चावित्येव कृत्वा प्रत्ययग्रहणं न कार्यमिति केचित् च्रुकमादावितिपठित्वात्तदपि व
क्तव्यं नास्तीत्युक्तं न च गणग्रहणापत्तिः कुआदिसमुदायघटके उत्तरपदे इत्येवमर्थस्य विलंबोपस्थितिकत्तया कुआदिर्यस्य तस्मिन् उत्तर-
पदे इत्यर्थस्य शीघ्रोपस्थितिकतया तदभावादित्याहुः निपातनादिति क्वचिदन्तोदात्तस्यापि स्यान्निर्वादः वादशब्दयोगे प्राप्ते अन्त्यादृ प्राकरण
रूपस्वामि मतनिपातनाभावादिदं चिन्त्यम् अभेदकाभेदकाइतिस्वीकर्तृमते तु युक्तमेवेति तत्त्वम् अदसोऽसेः नदोष इति ननु अदकयत्तेः

क्विपिमुत्वापत्तिरितिचेन्न निर्दिश्यमानत्वाभावेन वारणात् नचावाजू विषयेनसा तस्याः तिङ्‌ःतविषयादावेवप्रवृत्तेरुक्तत्वात् नचैवममुकेइ
त्यसंगतंतस्यासाधुत्वात् परंतुक्विवंतेपीष्टमेवमुत्वमितिनामुके इत्यसंगतमित्याहुः॥शाब्दांतरेति दीर्घकृतेत ह्यक्तेरभावेनह्रस्व स्यापिशब्दा
न्तरप्रासिकत्वमितिर्विचिन्त्यम् परनिमित्तकत्वेनेति सुस्रूषति सुस्रूषति इत्यादावप्युक्तांतरंगत्वात् द्विर्वचनेऽभ्यासेउकारस्याश्रवणानापत्तिरिति
तादृशांतरंगत्वं चुंचुपूचणायोर्यक् वृद्धिकृतलक्ष्यभेदानाश्रयणमिति एवोच्यतेत्रविषयेजातवहिरंगस्यलेएव नतुसमकालप्राप्ति
केइत्युक्तम्॥एवंचप्रकृतेपिनान्तरंगत्वमितिचिन्त्यमेतत् यद्वाउदवोढामित्यर्थमेकव्यक्तिवृत्तिविकारकृतलक्ष्यभेदानाश्रयणमित्ये
वोच्यते॥प्रकृतेतुव्यक्तिद्वयवृत्तिदीर्घइकारस्यभेदएवेतिनलक्ष्यैकलक्षणन्यायप्रवृत्तिः॥ ॥ननूषतुरित्यत्रव्यक्तिद्वयवृत्तित्वात् पुनर्ह्र
स्वापत्तिरितिचेदेवंवस्यामः पूर्वोक्ताकारस्यनपुंसकत्वमुत्तरस्यतुपुंस्त्वंतयोः समाहारेसुबोधान्विति अपेक्षयापूर्वदीर्घह्रस्वइत्यसिद्धि
रितिचिंत्यमेवेतत् उ कालइत्यपिचिंत्यमेवतन्मतेप्युकरस्यसवर्णग्रहणात् असंदेहायह्रस्वोच्चारितइतिचेत्तत्प्रकृतेपिवाच्यमिति वस्तुतस्त
त्वीकारेसनासंज्ञेत्यादावापत्तिः अदेशएवेत्युक्तेतुसंकोचएवदोषःस्यात् किंचोदुपधायाइत्यत्रानयैवसिद्धेप्रश्लेषपरभाष्यविरोधः किंचभा
व्यभानेनेत्यत्रस्वरितातिरिक्तविशेषणान्निषेधाप्राप्त्यावैयर्थ्याभावः अष्टादशानांग्रहणंतुनतत्रप्रयोजनाभावात् स्वरमात्रस्यैवोपयोगात् किं
चतपरप्राप्तस्यनानयानिषेधइतिपक्षिमवीत्यत्रोशस्वरउक्तत्वात् तपरकरणंचरितार्थमेव किंचादसोमादित्यत्रानेनप्रश्लेषसिद्धौप्रयोजनाभावः ना

चद्वकारे एवं प्रगृह्यार्थं चरितार्थम् अत्रापि अदस अमु आदेशविधानेनैव सिद्धे गुरुस्पन्यासादेव तत्सिद्धेः अमुके इत्यत्र सर्वादेशपतिस्तु
न स्यात्साधुत्वाया उक्तत्वात् अदमुयङ् इत्यर्थं न तत्राद अद्र्यङ् इत्येव सिद्धान्तयिष्यमाणत्वात् अत एव द्वयं नाश्रयणीयेवेत्यन्यत्र विस्तरः॥ मेवावश्य
कमिति· इदं तु नत्वं भसंज्ञापदत्व पंचमीस्त्रीयेपि भवति न पदं तु भाष्यादिरिति नलोप इति सूत्रे पियचिभमिति स्यामि प्रत्यापदत्वप्रतिबंधात्म
लोपाभावार्थं कार्यकालत्वं युक्तमेव किंचाष्टाध्यायीकृतपरत्वाश्रयणात् परत्वात् भसंज्ञैवेति न दोष इति तत्त्वम्· एवं च भाष्यमपि नैकदे
श्युक्तिः अंगेन प्रत्ययाक्षेपस्य सर्वत्रोक्तेः प्रत्यय इत्युपस्थित स्थानेविशेषणाच्च· उत्थिताकांक्षत्वमत्र निरस्तत्वम् अत्वविषं यदिति तेन-
आत्वविषयस्यापि संग्रहः॥ मानाभावादिति अत्र गुरुचरणाः कश्चिदंत्यसदेशानंत्यसदेशयोः प्राप्तिप्रसिद्धे अन्त्यसदेशे घस्तीति रत्रोत्वस्य
तथात्वेपि न प्रवृत्तिः अवधारणगर्भानंत्यसदेशस्यैव विकाराभावात् अमुमित्यत्रास्यापि प्राप्तेः मकारादावपि न प्रवृत्तिः एकप्रयोगे द्विशब्दे
न्त्यसदेशानंत्यसदेशयोः प्राप्त्यभावात् रेफेणाव्यवधानादंत्यसदेशत्वाभावकृत् अत एव चोक्तं एके इति भाष्यप्रयोग उपपन्नः अन्यथान्त्यसदे
शत्वाभावात् मुत्वानापत्तिः तस्माद प्रवृत्तिरेव युक्तेति नाप्यदमुयङिति भवितव्यमिति भाष्यविरोधः तत्र अः सेरिति पक्षे एवं भवितव्यं तन्न
स्यादिति शंकायामुक्तं चेति समाधानेनादोषात् समाधानं तु केचिदिच्छंति वस्तुतस्तु येनेत्येवेति भाष्याशयेनादोषात् तस्माद अद्र्यङ् इ-
त्येवं द्वयमिति सिद्धान्तमाहुः॥ अत एव हि प्रयुक्ता इति सुधियः। समोमिङिति· ननु अकचिकृते न विशिष्टस्यादेशार्थं यथान्यासं एवास्तु इति शं

स॰ भ॰ क्विपिमुत्वापत्तिरितिचेन्न निर्दिश्यमानत्वाभावेन वारणात् नचाबाजूविषयेन सा तस्याः तिङं नविषयादावेव प्रवृत्तेरुक्तत्वात् नचैवमनुकेइ

